# Shri Medha Dakshinamurti Trishati 300 Names

# श्रीमेधादक्षिणामूर्तित्रिशती

## Document Information

Text title : Medha Dakshinamurti Trishati Namavali 300 Names

File name : medhAdakShiNAmUrtitrishati.itx

Category : shatInAmAvalI, shiva

Location : doc_shiva

Transliterated by : Sneha Sudha snehasudha13 at gmail.com

Proofread by : Sneha Sudha snehasudha13 at gmail.com

Latest update : July 14, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीमेधादक्षिणामूर्तित्रिशती

ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा ।
मन्त्राक्षराद्यादिमा श्रीमेधादक्षिणामूर्तित्रिशती ।

ॐ ओङ्काररूपाय नमः । ओङ्कारगृहकर्पूरदीपकाय ।
ओङ्कारशैलपश्चास्याय । ओङ्कारसुमहत्पदाय । ओङ्कारपञ्जरशुकाय ।
ओङ्कारोद्यानकोकिलाय । ओङ्कारवनमायुराय ओङ्कारकमलाकराय ।
ओङ्कारकूटनिलयाय । ओङ्कारतरुपल्लवाय । ओङ्कार चक्रमध्यस्थाय ।
ओङ्कारेश्वरपूजिताय । ओङ्कारपदसंवेद्याय नमः । १३

नन्दीशाय नमः । नन्दिवाहनाय । नारायणाय । नराधाराय ।
नारीमानसमोहनाय । नान्दीश्राद्धप्रियाय । नाट्यतत्पराय । नारदप्रियाय ।
नानाशास्त्ररहस्यज्ञाय । नदीपुलिनसंस्थिताय । नम्राय । नम्रप्रियाय ।
नागभूषणाय नमः । २६

मोहिनीप्रियाय नमः । महामान्याय । महादेवाय । महाताण्डवपण्डिताय ।
माधवाय । मधुरालापाय । मीनाक्षीनायकाय । मुनये । मधुपुष्पप्रियाय ।
मानिने । माननीयाय । मतिप्रियाय । महायज्ञप्रियाय नमः । ३९

भक्ताय नमः । भक्तकल्पमहातरवे । भूतिदाय । भगवते ॥

भक्तवत्सलाय । भवभैरवाय । भवाब्धितरणीपायाय । भाववेद्याय ।
भवापहाय । भवानीवल्लभाय । भानवे । भूतिभूषितविग्रहाय नमः । ५१

गणाधिपाय नमः । गणाराध्याय । गम्भीर । गणभृते । गुरवे ।
गानप्रियाय । गुणाधाराय । गौरीमानसमोहनाय । गोपालपूजिताय । गोप्त्रे ।
गौराङ्गाय । गिरिशाय । गुहाय नमः । ६४

वरिष्ठाय नमः । वीर्यवते । विदुषे । विद्याधाराय । वनप्रियाय ।
बसन्तपुष्परुचिरमालालङ्कृतमूर्धजाय । विद्वत्प्रियाय ।
वीतिहोत्राय । विश्वामित्रवरप्रदाय । वाक्पतये । वरदाय । वायवे ।

वाराहीहृदयङ्गमाय नमः । ७७

तेजःप्रदाय नमः । तन्त्रमयाय । तारकासुरसङ्घहृते ।
ताटकान्तकसम्पूज्याय । तारकाधिपभूषणाय । त्रैयम्बकाय ।
त्रिकालज्ञाय । तुषाराचलमन्दिराय । तपनाग्निशशाङ्काक्षाय ॥

तीर्थाटनपरायणाय । त्रिपुण्ड्रविलसत्भालफलकाय । तरुणाय ।
तरवे नमः । ९०

दयालवे नमः । दक्षिणामूर्तये । दानवान्तकपूजिताय ।
दारिद्रचनाशकाय । दीनरक्षकाय । दिव्यलोचनाय ।
दिव्यरत्नसमाकीर्णकण्ठाभरणभूषिताय । दुष्टराक्षसदर्पघ्नाय ।
दुराराध्याय । दिगम्बराय । दिक्पालकसमाराध्यचरणाय । दीनवल्लभाय ।
दम्भाचारहराय नमः । १०३

क्षिप्रकारिणे नमः । क्षत्रियपूजिताय । क्षेत्रज्ञाय । क्षामरहिताय ।
क्षौमाम्बरविभूषिताय । क्षेत्रपालार्चिताय । क्षेमकारिणे ।
क्षीरोपमाकृतये । क्षीराब्धिजामनोनाथपूजिताय । क्षयरोगहृते ।
क्षपाकरधराय । क्षोभवर्जिताय । क्षितिसौख्यदाय नमः । ११६

नानारूपधराय नमः । नामरहिताय । नादतत्पराय । नरनाथप्रियाय ।
नग्नाय । नानालोकसमर्चिताय । नौकारूढाय । नदीभर्त्रे । निगमाश्वाय ।
निरञ्जनाय । नानाजिनधराय । नीललोहिताय । नित्ययौवनाय नमः । १२९

मूलाधारादिचक्रस्थाय नमः । महादेवीमनोहराय ।
माधवार्चितपादाब्जाय । माख्यपुष्पार्चनप्रियाय । मन्मथान्तकराय ।
मित्रमहामण्डलसंस्थिताय । मित्रप्रियाय । मित्रदन्तहराय ।
मङ्गलवर्धनाय । मन्मथानेकधिकारिलावण्याञ्चितविग्रहाय ।
मित्रेन्दुकृत चक्राढयमेदिनी रथनायकाय । मधुवैरिणे । महाबाणाय ।
मन्दराचलमन्दिराय नमः । १४३

तन्वीसहायाय नमः । त्रैलोक्यमोइनास्त्रकलामयाय ।
त्रिकालज्ञानसम्पन्नाय । त्रिकालज्ञानदायकाय ।
त्रयीनिपुणसंसेव्याय । त्रिशक्तिपरिसेविताय । त्रिणेत्राय ।
तीर्थफलकाय । तन्त्रमार्गप्रवर्तकाय । तृप्तिप्रदाय ।
तन्त्रयन्त्रमन्त्रतत्परसेविताय । त्रयीशिखामयाय नमः । १५५

यक्षकिन्नराधमरार्चिताय नमः । यमबाधाहराय । यज्ञनायकाय ।
यज्ञमूर्तिभृते । यज्ञेशाय । यज्ञकर्त्रे । यज्ञविघ्नविनाशनाय ।
यज्ञकर्मफलाध्याक्षाय । यज्ञभोक्त्रे । युगावहाय । युगाधीशाय ।
यदुपतिसेविताय नमः । १६७

महदाश्रयाय नमः । माणिक्यकङ्कणकराय । मुक्ताहारविभूषिताय ।
मणिमञ्जीरचरणाय । मलयाचलनायकाय । मृत्युञ्जयाय ।
मृत्तिकराय । मुदिताय । मुनिसत्तमाय । मोहिनीनायकाय । मायापत्यै ।
मोहनरूपधृते नमः । १७९

हरिप्रियाय नमः । हविष्याशाय । हरिमानसगोचराय । हराय ।
हर्षप्रदाय । हालाहलभोजनतत्पराय । हरिध्वजसमाराध्याय ।
हरिब्रह्मेन्द्रपूजिताय । हारीतवरदाय । हासजितराक्षससंहतये ।
हृत्पुण्डरीकनिलयाय । हतभक्तविपद्गणाय नमः । १९१

मेरुशैलकृतावासाय नमः । मन्त्रिणीपरिसेविताय ।
मन्त्रज्ञाय । मन्त्रतत्वार्थपरिज्ञानिने । मदालसाय ।
महादेवीसमाराध्यदिव्यपादुकरञ्जिताय । मन्त्रात्मकाय । मन्त्रमयाय ।
महालक्ष्मीसमर्चिताय । महाभूतमयाय । मायापूजिताय ।
मधुरस्वनाय नमः । २०३

धाराधरोपमगलाय नमः । धरास्यन्दनसंस्थिताय ।
ध्रुवसम्पूजिताय । धात्रीनाथभक्तवरप्रदाय । ध्यानगम्याय ।
ध्याननिष्ठहृत्पद्मान्तरपूजिताय । धर्माधीनाय । धर्मरताय ।
धनदाय धनदप्रियाय । घनाध्यक्षार्चनप्रीताय ।
धीरविद्वज्जनाश्रयाय नमः । २१५

प्रणवाक्षरमध्यस्थाय नमः । प्रभवे । पौराणिकोत्तमाय ।
पद्मालयापतिनुताय । परस्त्रीविमुखप्रियाय । पञ्चब्रह्ममयाय ।
पञ्चमुखाय । परमपावनाय । पञ्चबाणप्रमथनाय । पुरारातये ।
परात्पराय । पुराणन्यायमीमांसधर्मशास्त्र प्रवर्तकाय नमः । २२७

ज्ञानप्रदाय नमः । ज्ञानगम्याय । ज्ञानतत्परपूजिताय ।
ज्ञानवेद्याय । ज्ञातिहीनाय । ज्ञेयमूर्तिस्वरूपधृते । ज्ञानदात्रे ।
ज्ञानशीलाय । ज्ञानवैराग्यसंयुताय । ज्ञानमुद्राश्रितकराय ।
ज्ञातमन्त्रकदम्बकाय । ज्ञानवैराग्यसम्पन्नवरदाय नमः । २३९

प्रकृतिप्रियाय नमः । पद्मासनसमाराध्याय । पद्मपत्रायतेक्षणाय ।
परस्मै ज्योतिषे । परस्मै धाम्ने । प्रधानपुरुषाय । परस्मै ।
प्रावृड्विवर्धनाय । प्रावृण्णिधये । प्रावृड्वगेश्वराय ।
पिनाकपाणये । पक्षीन्द्रवाहनाराध्यपादुकाय नमः । २५१

यजमानप्रियाय नमः । यज्ञपतये । यज्ञफलप्रदाय । यागाराध्याय ।
योगगम्याय । यमपीडाहराय । पतये । यातायातादिरहिताय ।
यतिधर्मपरायणाय । यादोनिधये । यादवेन्द्राय ।
यक्षकिन्नरसेविताय नमः । २६३

छन्दोमयाय नमः । छत्रपतये । छत्रपालनतत्पराय । छन्दः
शास्त्रादिनिपुणाय । छान्दोग्यपरिपूरिताय । छिनाप्रियाय । छत्रहस्ताय ।
छिन्नामन्त्रजपप्रियाय । छायापतये । छद्मगारये । छलजात्यादिदूरगाय ।
छाद्यमानमहाभूतपञ्चकाय नमः । २७५

स्वादु तत्पराय नमः । सुराराध्याय । सुरपतये । सुन्दराय ।
सुन्दरीप्रियाय । सुमुखाय । सुभगाय । सौम्याय । सिद्धमार्गप्रवर्तकाय ।
सर्वशास्त्ररहस्यज्ञाय । सोमाय । सोमविभूषणाय नमः । २८७

हाटकाभजटाजूटाय नमः । हाटकाय । हाटकप्रियाय ।
हरिद्राकुङ्कुमोपेतदिव्यगन्धप्रियाय । हरये ।
हाटकाभरणोपेतरुद्राक्षकृतभूषणाय । हैह्येशाय । हतरिपवे ।
हरिमानसतोषणाय । हयग्रीवसमाराध्याय । हयग्रीववरप्रदाय ।
हारायितमहाभक्त सुरनाथमहोहराय । दक्षिणामूर्तये नमः । ३००

दक्षिणामूर्तये विद्महे ध्यानाधिष्ठाय धीमहि । तन्नो बोधः प्रचोदयात् ॥

ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा ।
मन्त्राक्षराद्यादिमा श्रीमेधादक्षिणामूर्तित्रिशती समाप्ता ।

श्रीमेधादक्षिणामूर्ति मूलमन्त्र त्रिशती नामावली

Encoded and proofread by Sneha Sudha

*Shri Medha Dakshinamurti Trishati 300 Names*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*